| | | |
|---|---|---|
| [1]चिरयिता-त्री, | चिराययिता-त्री, | चिचिरयिषिता-त्री ; |
| [2]चिरिण्वन्-ती, | चिराययन्-न्ती, | चिचिरयिषन्-न्ती ; |
| चिरयिष्यन्-न्ती-ती, | चिराययिषिष्यन्-न्ती-ती, | चिचिरयिषिष्यन्-न्ती-ती ; |
| — | चिराययमाणः, चिराययिषिष्यमाणः ; | — |
| [3]चिरित्-चिरितौ-चिरितः ; | — | — |
| [4]चिरीतम्-तः, | [5]चिरायितम्-तः, | चिचिरयिषितः-तवान् ; |
| चिरयः, | चिरायः, | चिचिरयिषुः ; |
| चिरयितव्यम्, | चिराययितव्यम्, | चिचिरयिषितव्यम् ; |
| चिरयणीयम्, | चिरायणीयम्, | चिचिरयिषणीयम् ; |
| [6]चिरेयम्, | चिराय्यम्, | चिचिरयिष्यम् ; |
| ईषच्चिरयः-दुश्चिरयः-सुचिरयः ; | — | — |
| [7]चिरीयमाणः, | चिराय्यमाणः ; | चिचिरयिष्यमाणः ; |
| [8]चिरयः, | चिरायः, | चिचिरयिषः ; |
| चिरयितुम्, | चिराययितुम्, | चिचिरयिषितुम् ; |
| [9]चिरितिः, | चिरायणा, | चिचिरयिषा; |
| [A]चिरयणम्, | चिरायणम्, | चिचिरयिषणम् ; |
| [10]चिरयित्वा, | चिराययित्वा, | चिचिरयिषित्वा; |

---

1. 'सार्वधातुकार्धधातुकयोः' (7-3-84) इति गुणे, अयादेशे च रूपम्। एवं तव्यानीयरादिषु च बोध्यम्।
2. 'स्वादिभ्यः—' (3-1-63) इति श्नुः विकरणप्रत्ययः, 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यणादेशे, 'अट्कुप्वाङ्नुम्—' (8-4-2) इति णत्वे च रूपम्।
3. क्विपि, 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुक्।
4. निष्ठायामिडागमे, अङ्गस्य-इटश्च, 'अकः सवर्णे—' (6-1-101) इति दीर्घः।
5. 'निष्ठायां सेटि' (6-4-52) इति णेर्लोपः।
6. 'अचो यत्' (3-1-97) इति यति गुणः।
7. यकि, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
8. भावे 'एरच्' (3-3-56) इति अच्। घञपवादः।
9. क्तिनि, 'तितुत्र—' (7-2-9) इतीण्णिषेधः।
10. 'न क्त्वा सेट्' (1-2-18) इति क्त्वायाः कित्त्वनिषेधाद् गुणायादेशयो रूपम्।
A. 'क्ष्मां दध्नुवन् मखचमिव्यसनानि रिण्वन् ऋक्षिण्वतां चिरयणेरपथं जिरिण्वन्।' धा. का. 2 71.